# अज्ञातकर्तृक सुभाषितसञ्चय : भूमिका

सं. विजयशीलचन्द्रसूरि

सम्भवतः १६मा शतकनी लखायेली, १० पत्रनी एक हस्तप्रति उपरथी तैयार करवामां आवेल आ सुभाषित-सञ्चयना रचयिता के संकलनकर्ता अज्ञात छे. जुदा जुदा २० पदार्थोने विषय बनावीने, ते प्रत्येक विषय पर रचायेला अष्टकोनो आ सरस सञ्चय छे. आ सञ्चयना अन्तिम अष्टक (आत्म)निन्दाष्टकनो सीधो सम्बन्ध जैन साधुना जीवन साथे होवाथी, तेमज १८मा अष्टकना पांचमा श्लोकनो विषय 'जिनपति' अेटले के जैन तीर्थंकर होवाथी, आ सञ्चयना प्रणेता कोई जैन मुनि छे, ए वात स्वयं स्पष्ट थई जाय छे. अलबत्त, मोटा भागना श्लोको तो विविध कविओनी रचना-स्वरूप ज जणाय छे, छतां आमां संकलनकारे रचेलां पद्यो पण समाविष्ट होवानी सम्भावना नकारी तो न ज शकाय. खास करीने 'निन्दाष्टक' ए संकलनकारनी रचना होवानुं मानी शकाय.

आ सञ्चयनी विशेषता ए छे के दरेक अष्टकमां आवनारा श्लोकोना प्रथम पदोनो क्रमिक समन्वय करीने ते ते अष्टकनो प्रथम श्लोक रचवामां आव्यो छे. अर्थात् प्रथम श्लोकमां ज पछीना बधा श्लोकोना प्रतीक-पदोनुं संयोजन रचीने ते अष्टकमां समाविष्ट श्लोकोनो निर्देश करी देवायो छे, अने साथे साथे ते ते अष्टकनुं नाम पण गुंथी लेवायुं छे. प्रथम दृष्टिए अष्टकनी संख्या २०नी छे, छतां खरेखर १९ अष्टको ज छे. १०मा क्रमांकना अष्टकमां मात्र प्रतीक-श्लोक ज छे, अन्य श्लोको नथी; वस्तुतः ते ज प्रतीक-श्लोक, आगळ जतां १९मा अष्टकना प्रारम्भे पुनः जोवा मळे छे. ए रीते विधिअष्टक के भग्नाशविधि-अष्टक ए बन्ने एक ज छे, जुदा नहि. आथी कुल १९ अष्टको ज होवानुं सिद्ध थाय छे.

अष्टकोनां नामो क्रमशः आ प्रमाणे छे : हंसाष्टक, चक्र(वाक), भ्रमर, करभ, हरिण, सिंह, धवल, सज्जन, वानरवल्लभ, भग्नाशविधि, मेघ, समुद्र, सत्पुरुष, गज, वृक्ष, बप्पीह, रत्न, देव, विधि, निन्दाष्टक. आ अष्टकोमां गुंथायेला श्लोको मुख्यत्वे अन्योक्तिरूप छे के पछी सुभाषितरूप छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

९मा अष्टकनुं नाम 'वानरवल्लभाष्टक' छे. तेना प्रथम पद्यमां 'वानरवल्लभेन' एवो प्रयोग छे, ते परथी ते कोई कविनुं नाम होवानुं अनुमान थाय छे. सुभाषितोना प्रसिद्ध संग्रहो जोवाथी आ विषे विशेष जाणकारी मळे ते सम्भवित छे. आ ज पद्यमां 'उल्लिङ्गनावृत्तमुदाजहार' – उल्लिङ्गना वृत्तनो (के उल्लिङ्गनाना चरित्रनो ?) दाखलो आप्यो' एवो प्रयोग छे, तेनुं तात्पर्य पण मेळववुं रहे छे.

पद्यसंख्या तपासीए तो प्रथम प्रतीक श्लोकने बाद करीने ज अष्टकोनी ८-८ श्लोकोनी संख्या प्राप्त थाय छे. तेथी १, ३, ४, ५, ७, ९, १२, १४, १७ आटला अष्टको मां ९-९ पद्यो छे. ते सिवायनां अष्टकोमां देखाती वधघट आम छे : २, ११, १५, १९, २०, आटलां अष्टकोमां १० पद्यो, ६मां ११ पद्यो, १३मां ७ पद्य, १६ अने १८ मां ८-८ पद्यो छे. कुल पद्य संख्या १७५ थाय छे.

१३मा सत्पुरुषाष्टकमां प्रतीक-पद्यमां 'नम्रत्व' अने 'विपदि' ए बे प्रतीको होवा छतां ते प्रतीकथी प्रारंभाता श्लोको नथी. ते क्रमशः 'नम्रत्वेनो न्नमन्तः' तथा 'विपदि धैर्यमथाभ्युदये क्षमा' – ए बे प्रसिद्ध पद्यो होय तेम अनुमान थाय छे. १५मा अष्टकमां छठ्ठा पद्यनुं मात्र प्रतीक ज लखेल छे, पद्य नहि; ते ज रीते १६-२ तथा १९-८ विषे पण तेवुं ज छे. १६मा अष्टकमां 'हंहो चातक' एवुं प्रतीक प्रथम श्लोकमां होवा छतां ते पद्य क्यांय छे नहि. तो १६मा अष्टकमां जोडवाना सूचक चिह्न साथे पत्र ८/१ना फाटेल हासियामां 'किमत्र'थी प्रारंभातो त्रुटित श्लोक जोवा मळे छे. १५मा अष्टकमां प्रथम-पद्य-प्रदर्शित 'भुक्तं' अने 'तथैव च' प्रतीकवाळा श्लोको नथी, पण 'हंहो' अने 'भ्राम्यद्' (पद्य ९-१०) ए शब्दोथी शरु थतां बे श्लोको छे. आ श्लोकोनो संकेत प्रतीक-पद्यमां नथी मळतो. १८मा अष्टकमां प्रतीक-पद्य ज नथी, अने ७मा श्लोकनुं १ चरण त्रुटित छे, तो एक चरण छे ज नहि.

१७मा रत्नाष्टकना ८मा श्लोकमां एक मजानो शब्दप्रयोग छे : 'कस'. कवि कहेवा जाय छे के 'कः सः सुहृद्, यस्याऽयमावेद्यते', पण आ शब्दो आ ज रीते योजवा जतां छन्दोभंग थाय, एटले कवि आ शब्दोने बोलचालनी भाषाना अपभ्रष्ट प्रयोगमां ढाळीने लखे छे – 'कस सुहृद्' आवो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रयोग कविसमयमां प्रचलित होय तो ते विषे हुं अजाण छुं.

२०मुं निन्दाष्टक ते अन्यत्र 'आत्मनिन्दाष्टक'ना नामे प्रसिद्ध छे. कठोर रीते स्व-आलोचना होवाने कारणे जैन साधुसंघमां आ अष्टकने खास प्रचार नथी मळ्यो. आ अष्टक ई. १८९६मां निर्णयसागर प्रेस द्वारा प्रकाशित 'काव्यमाला'ना ७मा गुच्छमां पृ. ९५-९६ मां प्रगट थयेल छे. त्यां पण तेना कर्तानुं नाम नोंधायुं नथी. ते वाचनामां मळतां त्रणेक पाठान्तरो अत्रे टिप्पणीरुपे नोंध्यां छे; तथा तेमां रहेल क्षतिओ आ मुद्रणना आधारे सुधारी शकाय तेम छे. त्यां जोवा मळती क्षतिओ आ प्रमाणे छे :

'कर्मक्लेशविनाशसंभवविमुख्या(मुख्या)न्यद्यापि नो लेभिरे' (५)
'किमचरमगुणस्थानकं कर्मदोषात्' (६)
'शय्यापुस्तकपुस्तकोपकरणं' (७)
'नितरामाजन्मवृद्धा वयं' (७)
'वणिगदुर्वासनाशात्मिनाम्' (८)
'कोपेयं कृपणोऽकृपापरिवृतैः (?) कार्यं' (९)

आ तमाम पाठो प्रस्तुत प्रतिमां शुद्धस्वरूपे जोवा मळे छे. वधुमां त्यां ९-१० पद्योमां व्यत्यय जोवा मळे छे.

आ अष्टकोमां संकलित सुभाषितो अने अन्योक्तिओ अत्यन्त प्रसन्नकर छे. एमांये केटलांक पद्यो तो वारंवार वांचवा-गावा गमे तेवां अने हृदयवेधी छे. कोई सहृदय भावक आ सुभाषितोनुं रसदर्शन करावे तो सरस रसास्वाद-कृति सर्जाय तेम छे.

## अष्टकानि ॥

(अज्ञातकर्तृकः सुभाषितसञ्चयः)

### (१)

यः सन्तापं गाङ्गं सन्त्यन्यत्रापि तटगतं स्मरसि ।
अपसरणमथ स्थित्वा गदितं **हंसाष्टकं** नाम ॥१॥

यः सन्तापमपाकरोति जगतां यश्चोपकारक्षमः
सर्वेषाममृतात्मकेन वपुषा प्रीणाति नेत्राणि यः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्याप्युन्नतिमम्बुदस्य सहसे यत्र त्वमेतावता
वर्णेनैव परं मराल ! धवलः कृष्णश्चरित्रैरसि ॥२॥

गाङ्गमम्बु सितमम्बु यामुनं, कज्जलाभमुभयं निमज्जतः ।
चीयते न च न चाऽपचीयते, राजहंस ! तव शुद्धपक्षता ॥३॥

सन्त्यन्यत्रापि वीचीचयचकितचलत्क्रौञ्चचञ्चुप्रभिन्न-
प्रोन्निद्राम्भोजरेणुप्रकरविरचनाहारिवारिप्रवाहाः ।
किन्तु स्वच्छाशयत्वं जगति न सुलभं तेन गत्वाऽपि दूरं
बद्धो क(त्क)ण्ठानुरागादनुसरति सरो मानसं राजहंसः ॥४॥

तटमनुतटं पद्मे पद्मे निवेसि(शि)तमानसं
प्रतिकमलिनीपत्रच्छायं क्षणं क्षणमासितम् ।
नयनसलिलैरुष्णैः कोष्णां कृता जलवीचयो
जलदमलिनां हंसेनाऽऽशां विलोक्य गमिष्यताम् ॥५॥

गतं तद्गाम्भीर्यं तटमुपचितं जालिकशतैः
सखे ! हंसोत्तिष्ठ त्वरितममुतो यामि सरसः ।
न यावत् पङ्काम्भःकलुषिततनुर्भूरि विलसन्
बकोटो वाचाटश्चरणयुगलं मूर्ध्नि कुरुते ॥६॥

सरसि सरसि वीची मन्ददोलायितानां
तदनु विलसताऽग्रं त्वन्मुखाद् यन्मयाऽऽत्तम् ।
इति मनसि निविष्टामालपेन्नैव हंसीं
त्यजति विरहखेदाज्जीवितं राजहंसः ॥७॥

अपसरणमेव युक्तं मौनं वा तत्र राजहंसस्य ।
कटु रटति निकटवर्ती वाचाटष्टिट्टिभो यत्र ॥८॥

स्थित्वा चिरं नभसि निश्चलतारकेण, मातङ्गसङ्गमलिनां नलिनीं विलोक्य ।
उत्पन्नमन्यु परिघर्घरनिस्वनेन, हंसेन साश्रु परिहृत्य गतं निलीनम् ॥९॥

हंसाष्टकम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(२)

अस्तं मित्रे वापी कवलित शतगुण दिनान्त एकेन ।
उत्कूजति कथय [तथा] वदन्ति **चक्राष्टकं** नाम ॥१॥

अस्तं गतोऽयमरविन्दवनैकबन्धु-
र्भास्वान्न लङ्घयति कोऽपि विधिप्रणीतम् ।
चक्राङ्ग ! धैर्यमवलम्ब्य विमुञ्च शोकं
धीरास्तरन्ति विपदं नहि दीनचित्ताः ॥२॥

मित्रे क्वापि गते सरोरुहवने बद्धानने क्लाम्यति
क्रन्दत्सु भ्रमरेसु वीक्ष्य दयिताश्लिष्टं पुरः सारसम् ।
चक्राङ्गेन वियोगिना बिशलता ना(नो) खादिता नोज्झिता
वक्त्रे केवलमर्गलेव निहिता जीवस्य निर्गच्छतः ॥३॥

वापीतोयं तटतरुवनं पद्मिनीपत्रशय्या ।
चन्द्रालोको विकचकुमुदामोदहृद्यः समीरः ।
यत्रैतेऽपि प्रियविरहिणो दाहिनश्चक्रनाम्न-
स्तत्रोपायः क इह भवतः प्राणसन्धारणाय ॥४॥

कवलितमिह नालं कन्दलं चेह दृष्टं
इह हि कुमुदकोशे पीतमम्भः सुशीतम् ।
इति विरटति रात्रौ पर्यटन्ती तटान्ते
सहचरपरिमुक्ता चक्रवाकी वराकी ॥५॥

श[त]गुणपरिपाट्यो पर्यटन्नन्तराले
कुमुदकुवलयानामर्द्धरात्रेऽप्यखिन्नः ।
उपनदि दयितायाः क्वापि शब्दं निशम्य
भ्रमति पुलिनपृष्टे चक्रवच्चक्रवाकः ॥६॥

दिनान्ते चक्रवाकेन प्रियाविरहभीरुणा ।
तथा निःश्वसितं तेन, यथा नोच्छ्वसितं पुनः ॥७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकेनार्कं प्रकटितरुषा पाटलेनाऽस्तसंस्थं
पश्यत्यक्ष्णाऽश्रुजललुलितेनाऽपरेण स्वकान्तम् ।
अह्नश्छेदे दयितविरहाशङ्किनी चक्रवाकी
द्वौ संकीर्णौ रचयति रसौ नर्तकीव प्रगल्भा ॥८॥

उत्कूजति श्वसिति मुह्यति याति तीरं, तीरान् तरुं तरुतलात् पुनरेति वापीम् ।
वापीं न तिष्ठति न चात्ति मृणालखण्डं, चक्रः क्षपासु विरहे खलु चक्रवाक्याः ॥९॥

कथय किमपि दृष्टं स्थानमस्ति श्रुतं वा, व्रजति दिनकरोऽयं यत्र नाऽस्तं कदाचित् ।
इति विहगसमूहान्नित्यमापृच्छतीदं, रजनिविरहभीतश्चक्रवाको वराकः ॥१०॥

**चक्राष्टकम् ॥**

( ३ )

येन कृत्वापि मातङ्गेऽन्यासु निराचष्टे च दूराच्च ।
प्रतिवेशिनिरानन्दो **भ्रमराष्टकमे**तदाख्यातम् ॥१।

येनामोदिनि केशरस्य मुकुले पीतं मधु स्वेच्छया
नीता येन निशाशशाङ्कधवले पद्मोदरे शारिदै (शारदी ?) ।
भ्रान्तं येन मदप्रवाहमलिने गण्डस्थले दन्तिनां
सोऽयं भृङ्गयुवा करीरविटपे बध्नाति तुष्टिं कुतः ॥२॥

कृत्वाऽपि कोशपानं, भ्रमरयुवा पुरत एव कमलिन्याः ।
अभिलषति बकुलकलिकां, मधुलिहि मलिने कुतः सत्यम् ? ॥३॥

मातङ्गेन मदावलिप्तमतिना यत्कर्णतालानिलै-
र्दानार्थं समुपागता मधुलिहो दूरं समुत्सारिताः ।
तस्यैधानमण्डनक्षितिरसौ भृङ्गाः पुनः सर्वतो
जीविष्यन्ति वनान्तरेषु विकसत्पुष्पासवैः सीधुभिः ॥४॥

अन्यासु तावदुपमर्दसहासु भृङ्ग !
लोलं विनोदय मनः सुमनोलतासु ।
मुग्धामिमामसरसां कलिकामकाले,
बालां कदर्थयसि किं नवमालिकायाः ? ॥५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निराचष्टे यष्टिं कुरुबकतरोरब्जसरसा-
मसद्भावं ब्रूते वदति च(?)बकुलानामकुशलम् ।
वनान्ते चूतानामभवनमिहाख्यातवसता-
मसौ झिण्टीझोटे झट(टि)ति घटमानो मधुकरः ॥६॥

दूरादुज्झति चम्पकं न च भजत्यम्भोजराजीरजो
नो जिघ्रत्यपि पाटलापरिमलं धत्ते न चूते रतिम् ।
मन्दारे मदनादरी विचकिलोपान्ते च सन्तप्यते
तन्मन्ये क्वचिदङ्ग ! भृङ्गतरुणेनाऽऽस्वादिता मालती ॥७॥

प्रतिवेसी(शी) हंसजनः क्रीडाभवनानि पुण्डरीकाणि ।
हृद्य मधुजलममलं मधुकर ! तत्रै[व] यदि रमसि(से) ॥८॥

निरानन्दः कौन्दे मधुनि विधुरो बालबकुले
न साले सालम्बो लवमपि लवङ्गे न रमते ।
प्रियाङ्गे नो सङ्गं रचयति न चूतेऽभिरमते
स्मरन् लक्ष्मीलीलाकमलमधुपानं मधुकरः ॥९॥

**भ्रमराष्टकम्** ॥

( ४ )

सरलित न भवति चिन्ता रूक्षं दुःप्राप वक्रमायाते ।
चर करभ सहितमस्यां कथितं **करभाष्टकं** नाम ॥१॥

सरलितगलनालीं कन्धरां धत्स्व धैर्यात्
करभ ! लघु शमीनां ग्रासमेकं गृहाण ।
सरसमधुरपत्रास्ताः कुतः पीलुजात्यो
हरिततरुकरीरे रे ! मरौ याः प्ररूढाः ॥२॥

न भवति मिथुनानां प्रेम लावण्ययोगा-
ज्जनयति सुखमन्तः कस्यचित् कोऽपि दृष्टः ।
पतति कुटिलदृष्टिर्दग्धदासेरकाणां
जरठ भुरुटवल्लीपिञ्जरासु स्थलीषु ॥३॥

चिन्तां मुञ्च गृहाण पल्लवमिदं प्लक्षस्य शालस्य वा
गङ्गा(गाङ्ग)स्याऽस्य जलस्य चन्द्रवपुषो गण्डूषये(मे)कं पिब ।
जीवन् द्रक्ष्यसि ताः पुनः करभ हे ! दासेरकेया भुवो
रम्याः पीलुशमीकरीरबदरीः कूजत्कपोताकुलाः ॥४॥

रूक्षं वपुर्न च विलोचनहारिरूपं
न श्रोत्रयोः सुखदमारटितं कदाचित् ।
इत्थं न साधु तव किञ्चिदिदं तु साधु
तुल्ये रति करभ ! कण्टकिनि द्रुमे यत् ॥५॥

दुःप्रापमम्बु पवनः पु(प)रुषोऽतितापी (पः?)
छायाभृतो न तरवः फलभाल(र?) नम्राः ।
इत्थं सखे ! करभ ! वच्मि भवन्तमुच्चैः
का सङ्गतिः खलु मरौ रमणीयतायाः ! ॥६॥

वक्रग्रीवमुदीक्षसे किमपरं बाष्पाम्बुपूर्णेक्षणः
कः खेदः करभाऽधुना तृणलवैः सन्तर्पयैतद्वपुः ।
कान्तान्तःस्फुरदोष्ठसम्पुटभुवो ये लीलयाऽऽन्दोलिता
मुक्तास्तेन च नीलकन्दल[दल]श्यामाः शमीपल्लवाः ॥७॥

आयाते दयिते मरुस्थलभुवां संचिन्त्य दुर्लङ्घ्यतां
गेहिन्या(:) परितोषबाष्पतरलामासाद्य सद्यो मुखे ।
दत्वा पीलुशमीकरीरकवलान् खे(स्वे)नाञ्चलेनादरात्
उन्मृष्टं करभस्य केसरसटाभाराग्रलग्नं रजः ॥८॥

चर करभ ! यथेच्छं सन्ति शि(श)ष्पाण्यरण्ये
बहुकुसुमसमृद्धाः पीलवश्च स्थलीषु ।
यदि गणयसि वाक्यं बन्धुवर्गस्य दूरात्
परिहर करवीरं मृत्युरेवैष सद्यः ॥९॥

**करभाष्टकम् ॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(५)

रज्वा स्थलीनामसकृत् प्रियायाः, छित्वा द्रुत त्यक्त समेतमन्याः ।
आद्यं पदं दर्शितमष्टभेदं, पूर्वप्रसिद्धं **हरिणाष्टकस्य** ॥१॥

रज्वा दिशः प्रविवताः सलिलं विषेण
पाशैर्मही हुतभुजा ज्वलिता वनान्ताः ।
व्याधाः पदान्यनुसरन्ति गृहीतचापाः
कं देशमाश्रयति यूथपतिर्मृगाणाम् ॥२॥

स्थलीनां दग्धानामुपरि मृगतृष्णामनुसरं-
स्तृषार्त्तः सारङ्गो विरमति न खिन्नेऽपि मनसि ।
अजानामस्त(स्ति)त्वं न च मृगयतेऽन्यत्र सरसी-
मभूमौ प्रत्याशया न च फलति विघ्नं च कुरुते ॥३॥

असकृदतकृत्तन्नष्टां मृगा मृगतृष्णिकां (?)
श्रमपरिगतोऽप्युत्पक्ष्माक्षः परैति पुनः पुनः ।
गणयति न तन्मायातोयं हतः सलिलाशया
भवति हि म[ति]स्तृष्णान्धानां विवेकपराङ्मुखा ॥४॥

प्रियायां स्वैरायामतिकठिनगर्भालसतया
किराते चाकर्णीकृतधनुषि धावत्यनुदिनम् ।
प्रियाप्रेमप्राणप्रतिभयवशात् पश्य विवशो
मृगः पश्चादालोकयति च मुहुर्याति च मुहुः ॥५॥

छित्वा पाशमपास्य कूटरचनां भङ्क्त्वा बलाद् वागुरां
पर्यन्ताग्निशिखाकलापजटिलान्निर्गत्य दूरं वनात् ।
व्याधानां शरगोचरादतिजवेनोत्पत्य धावन्मृगः
कूपान्तः पतितः करोतु विमुखे किं वा विधौ पौरुषम् ? ॥६॥

द्रुततरमितो गच्छ प्राणैः कुरङ्ग ! वियुज्यतो(ते)
किमिति चलितग्रीवं स्थित्वा मुहुर्मुहुरीक्ष्यते ।
विदधति हतव्याधा नैते मनागपि सार्द्रतां
कठिनमनसामेषामेते विलोकितविभ्रमा(ः) ॥७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्यक्तं जन्मवनं तृणाङ्कुरवती मातेव मुक्ता स्थली
विश्रामस्थितिहेतवो न गणिता बन्धूपमाः पादपाः ।
बालापत्यवियोगदुःखविधुरा मुक्ताऽर्धमार्गे मृगी
मार्गं तत्पदवी(वीं) तथाप्यकरुणा व्याधा न मुञ्चन्ति माम् ॥८॥

अन्यास्ता मलयस्य काननभुवः स्वच्छश्रवन्निर्ज(र्झ)रा-
स्तृष्णा यासु निवर्तते तनुभृतामालोकमात्रादपि ।
क्षुप्कां(ब्धाकां ?)क्षपरिग्रहो मरुरसौ स्फारीभवदधा(द्भ्रा?)न्तयः
ता एता मृगतृष्णिका हरिण हे ! नेदं पयो गम्यताम् ॥९॥

**हरिणाष्टकम् ॥**

( ६ )

क्षुत्क्षाममत्तेभमृगैर्मृगारि-रद्यापि निद्रा प्रकृतिर्यथेष्टम् ।
विश्रं वपुस्साम नयश्च लोके **सिंहाष्टकं** कस्य मुदे न पुंसः ? ॥१॥

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्रासो(यो)ऽतिकष्टां दशा-
मापन्नोऽपि विपन्नदीध(धि?)तिरपि प्राणेषु गच्छत्स्वपि ।
मत्तेभेन्द्रविशालकुम्भदलनव्यायामबद्धस्पृहः
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केशरी ॥२॥

मृगैर्नष्टं शशैर्लीनं, वराहैर्वलितं रुषा ।
हयानां हेषितं श्रुत्वा, सिंहैः पूर्ववदासितम् ॥३॥

मत्तेभकुम्भनिर्भेद-कठोरनखराशनि(:) ।
मृगारिरिति नाम्नैव लघुतामेति केशरी ॥४॥

मृगारिं वा मृगेन्द्रं वा, सिंहं व्याहरतां जनः ।
तस्य द्वयमपि व्रीडा, क्रीडादलितदन्तिनः ॥५॥

अद्यापि न स्फुरति केसरभारलक्ष्मी-
र्न प्रेषति ध्वनितमद्रिगुहान्तरेषु ।
मत्तास्तथापि हरिणा हरिणाधिपस्य
पश्यन्ति भ्रान्तमनसः पदवीं वनेषु (?) ॥६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निद्राघूर्णितलोचनो मृगपतिर्यावद् गुहां सेवते
तावत् स्वैरममी चरन्तु हरिणाः स्वच्छन्दसञ्चारिणः ।
उन्निद्रस्य विधूतकेसरसटाभारस्य निर्गच्छतो
नादे श्रोत्रपथं गते हतधियां सन्त्येव दीर्घा दिशः ॥७॥

प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसां हेतुः ।
सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ॥८॥

यथेष्टं चेष्टध्वं मदमलिनगण्डाः करटिनः ।
तटान्यद्रेर्मन्दं विकषत विषाणैश्च महथाः (महिषाः) ! ।
सरागं सारङ्गां ! सह सहचरीभिर्विचरताऽ-
प्रचारः सिंहानामिह न विधिना हन्त विहितः ॥९॥

विश्रं वपुः परवधप्रवणं च कर्म तिर्यक्तयैव कथितः सदसद्विवेकः ।
इत्थं न किञ्चिदपि साधु मृगाधिपस्य, तेजस्तु तं स्फुरति यस्य जगद् वराकम् ॥१०॥

सामोपायनयः प्रपञ्चपटवः प्रायेणः ये भीरवः
शूराणां व्यवसाय एव हि परं संसिद्धये कारणम् ।
विस्फूर्जद्विकटाटवीगजघटाकुम्भैकसंचूर्णन-
व्यापारैकरसस्य सन्ति विजये सिंहस्य के मन्त्रिणः ॥११॥

**सिंहाष्टकम् ॥**

( ७ )

मार्गे नखनसिचानसि नध्वानं गुरुर्यथात्र यस्यादौ ।
ऊ(व्यू)ढा येन सुधवलैर्गदितं **धवलाष्टकं** नाम ॥१॥

मार्गे कर्दमदुस्तरे जलभृते गर्त्ताशतैराकुले
खिन्ने शाकटिके भरेऽतिविषमे दूरं गते रोधसि ।
शब्देनैतदहं ब्रवीमि महता कृत्वोत्थितां तर्जनी-
मीदृक्षे विषमे विहाय धवलं वोढुं भरः(रं) कः क्षमः ? ॥२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नखनसिखुरैः क्षोणीपृष्टं न नर्दति सादरं
प्रकृतिपरुषं प्रेष्यासन्नं न कुप्यति गोतरम् ।
वहति च धुरं धुर्यो धैर्यादनुद्धरकन्धरो
जगति गुणिन(:) कार्यौदार्या[त्]परानतिशेरते ॥३॥

अनसि सीदति सैकतवर्त्मनि प्रचुरभारभरक्षपितोक्षणि ।
गुरुभरोद्धरणोद्धुरकन्धुरं स्मरति सा[रथि]रन्यधुरन्धरम् ॥४॥

न ध्वानं कुरुते(षे?) न यासि विकृतिं नोच्चैर्वहस्याननं
दर्पान्नोल्लिखसि क्षितिं खुरपुटैर्नाऽवज्ञया वीक्षसे ।
किन्तु त्वं वसुधातलैकधवलः स्कन्धाधिरूढे भरे
तीव्राण्युच्चतटे विटङ्कविषमाण्युल्लङ्घयन् लक्ष्यसे ॥५॥

गुरुर्नाऽयं भारः क्वचिदपि न पन्थाः स्थपुटितो
न ते कुण्ठा वोक्तिर्वहनमपि नाऽङ्गेन विकलम् ।
इह द्रङ्गे नाऽन्यस्तव गुणसमानस्तदधुना
धुनानेन स्कन्धं धवल ! किमु मुक्तः पथि भरः ? ॥६॥

यथा भग्नः पन्थाः परुषविषमग्रावगहने
गलानां नाऽङ्गानि स्पृशति च यथा सारथिरयम् ।
यथा चैते दृप्ताः खवलितभुवो यान्ति वृषभा-
स्तथा दूरीभूतः स खलु धवलो नूनमधुना ॥७॥

यस्यादौ व्रजमण्डनस्य बहुभिरु(र्व्यू)ढा न गुर्वी धुरा
धौर्येयैः प्रगुणीकृतो न युगपत् स्कन्धे समस्तैरपि ।
तस्यैव श्लथकम्बलस्य धवलस्योत्थापने साम्प्रतं
द्रङ्गेऽत्रैव जरावसादिततनोर्गोः पुण्यमुद्घुष्यते ॥८॥

व्यूढा येन महाधुरा सुविषमे मार्गे सदैकाकिना
सोढो येन कदाचिदेव न निजे णष्टेन्य (?)शण्डध्वनिः ।
आसीद् यश्च गवां गणस्य तिलकस्तस्यैव संप्रत्यहो !
धिक्कष्टं धवलस्य जातजरसो गोः पुण्यमुद्घुष्यते ॥९॥

**धवलाष्टकम् ॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(८)

दक्षो दानस्तब्धौ दुर्मन्त्री शुष्कमिन्धनं त्यजति ।
अर्धः(र्थः) ऋ(र)तौ लोके वा, **नरवृत्ताष्टकं** नाम ॥१॥

दक्षः श्रियमधिगच्छति पथ्याशी कल्यतां सुखमरागी ।
उद्योगी विद्यात्वं धर्मार्थयशांसि च विनीतः ॥२॥

दानं दरिद्रस्य विभोः प्रशान्ति-र्यूनां तपो ज्ञानवतां च मौनम् ।
इच्छानिवृत्तिश्च सुखोचितानां, दया च भूतेषु दिवं नयन्ति ॥३॥

स्तब्धस्य नश्यति यशो विषमस्य मैत्री
नष्टक्रियस्य कुलमर्थपरस्य धर्मः ।
विद्याफलं व्यसनिनः कृपणस्य सौख्यं
राज्यं प्रमत्तसचिवस्य नराधिपस्य ॥४॥

दुर्मन्त्रिणं कमु[प]यान्ति न नीतिदोषाः
सन्तापयन्ति कमप[थ्य]भुजं न रोगाः ।
कं श्रीर्न दर्पयति कं न निहन्ति तृष्णा
कस्कंत्तता (?) (कं कं तता) न विषयाः परितापयन्ति ॥५॥

शुष्केन्धनैर्वह्निरुपैति वृद्धिं,
मूर्खेषु कोपश्चपलेषु शोकः ।
कान्तासु कामो निपुणेषु वित्तं,
धर्मो दयावत्सु महत्सु धैर्यम् ॥६॥

त्यजति भयमकृतपापं मित्राणि शठं प्रमादिनो विज्जा(द्या) ।
हीः(ह्रीः) कामिन(नं) मलश्रीः स्त्री क्रूरं दुर्जनो लोकः (?) ॥७॥

अर्थस्य मूलं निकृतिः क्षमा च, कामस्य वित्तं च वपुर्वयस्य ।
धर्मस्य दानं हि दयादमौ च, मोक्षस्य सर्वार्थनिवृत्तिरेव ॥८॥

रतौ विवाहे व्यसने पि(रिं)पुक्षये
प्रियासु नारीषु धनेषु बन्धुषु ।
यशस्करे कर्मणि मित्रसङ्ग्रहे-
ष्वतिव्ययो नास्ति नराधिपाऽष्टसु ॥९॥

**सज्जनाष्टकम् ॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१)

माधुर्यमुत्साहसुजीर्णरूपं श्रुतेन **शाठ्येन** जवो हि वैद्यम् ।
नीतिप्रिया **वानरवल्लभेन, उल्लिंगनावृत्त**मुदाजहार ॥१॥

माधुर्यं प्रमदाजनेसु(षु) ललितं दाक्षिण्यमार्जे जने
शौर्यं शत्रुषु मार्दवं परिजने धर्मिष्टता साधुषु ।
मर्मज्ञेष्वनुवर्त्तना बहुविधा मानं जने गर्विते
शाठ्यं पापजने नरस्य कथितं पर्याप्तमष्टौ गुणाः ॥२॥

उत्साहसम्पन्नमदीर्घसूत्रिणं, क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरं कृतज्ञो(ज्ञं) दृढसौहृदं च, लक्ष्मीः स्वयं वाञ्छित(ञ्छति) वासहेतोः ॥३॥

सुजीर्णमन्नं सुविचक्षणः सुतः, सुशासिता स्त्री नृपतिः सुसेवितः ।
सुचिन्त्य चोक्तं सुविचार्य यत्कृतं, तदीर्घकालेऽपि न याति विक्रियाम् ॥४॥

रूपं जरा सर्वसुखानि तृष्णा, खलेषु सेवा पुरुषाभिमानम् ।
याच्ञा गुरुत्वं गुणमात्मशंसा, चिन्ता बलं हन्ति दयां च लक्ष्मीः ॥५॥

श्रुतेन बुद्धिर्व्यसनेन मूर्खता, प्रियेण नारी सलिलेन निम्नगा ।
निशा शशाङ्केन धृतिः समाधिना, नयेन चालंक्रियते नरेन्द्रता ॥६॥

शाठ्येन मित्रं कपटेन धर्मं, परोपतापेन समृद्धिभावम् ।
सुखेन विद्यां पुरुषेण नारीं, वाञ्छन्ति ये व्यक्तमपण्डितास्ते ॥७॥

जवो हि सप्तेः परमं विभूषणं, त्रपाऽङ्गनायाः कृशता तपस्विनः ।
द्विजस्य विद्येव मुनेरपि क्षमा, पराक्रमः शस्त्रब[लो]पजीविनाम् ॥८॥

वैद्यं पानरतं नटं कुपठितं मूर्खं परिव्राजकं
योधं कापुरुषं विटं गतवयं स्वाध्यायहीनं द्विजम् ।
राज्यं बालनरेन्द्रमन्त्ररहितं मित्रं छलान्वेषिणं
भार्यां यौवनगर्वितां पररतां मुञ्चन्ति ये पण्डिताः ॥९॥

**वानरवल्लभाष्टकम्** ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

( १० )

वीचीकैवर्त्तयद्भ्रम्नं (?), तथा शशिदिवाकरैः ।
अलं सृजति पोष्याश्च, भग्नाशस्याष्टकं विधेः ॥१०॥

( ११ )

सुखयसि विलपति यत्तत् तृषार्त्तमेतानि वितर हे मेघ ! ।
अयि जल मामभ्युन्नत-मिदमम्बुधराष्टकं नाम ॥१॥

सुखयसि तृषोत्ताम्यत्तालुस्खलद्ध्वनिविह्वलं
कतिपयपयोबिन्दुस्यन्दैर्न चातकमागतम् ।
जलधर ! यदा कालात् कोऽपि प्रचण्डसमीरणः
प्रवहति तदा न त्वं नाऽयं न ते जलबिन्दवः ॥२॥

विलपति तृषा सारङ्गोऽयं भवानयमुन्नतो
जलमपि च ते संयोगोऽयं कथञ्चिदुपस्थितः ।
उपकृतिकृते प्रह्वं चेतः कुरुष्व यदग्रतो
भ्रमति पवनः क्व त्वं क्वाऽयं क्व वा जलसंहतिः ॥३॥

यत्तद् गर्जितमूर्जितं यदपि च प्रोद्दामसौदामिनी-
दामाऽम्बरडम्बरे विरचितं यद्दूरमभ्युन्नतम् ।
तेषां पर्यवसानमेतदधुना जातं यदम्भोधरं
द्वित्रां कृत्रिमरोदनाश्रुतनवोन्मुक्ताः पयोबिन्दवः ॥४॥

तृषार्त्ते पाथोद ! प्रलपति पुरश्चातकशिशौ
यदेतन्नैष्ठुर्यं तदिह गदितुं मा त्वर इति ।
विपद् वा स्वाधीना किमुत जडता वा परिणता
मरुद्वानो वास्यत्यथ घन ! शरद् वा न भवति ॥५॥

एतान्यहानि किल चातकशावकेन, नीतानि कण्ठकुहरे स्थितजीवितेन ।
तस्यार्थिनो ज[ल]द ! पूरय वाञ्छितानि, मा भूत् त्वदेकशरणस्य
बत प्रमादः ॥६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वितर [वारिद !] वारि तृषातुरे, त्वरितमुद्यतचातकशावके ।
मरुति विस्फुरति क्षणमन्यथा, क्व च भवान् क्व पयः क्व च चातकः ॥७॥

हे मेघ ! मानमहितस्य तृषातुरस्य
त्यक्तत्वदन्यशरणस्य च चातकस्य ।
अम्भःकणान् कतिचिदप्यधुना विमुञ्च
नो चेद् भविष्यसि जलाञ्जलिदानयोग्यः ॥८॥

अय(यि) जलद ! यदि न दास्यसि, कतिचित् त्वं चातकाय जलकणिकाः ।
तदयमचिरेण भविता, सलिलाञ्जलिदानयोग्यस्ते ॥९॥

मामभ्युन्नतमागतोऽयमिति वा कामं समासेवते
मच्छायामिति वा यदन्यविषयं तद् द्वेष्टि वारीति वा ।
सद्यो वर्ष वराक चातककृते नो चेदयं याचिता
याच्ञा यावदुपेक्षणं च जलद ! व्रीडाकरं त्वादृशाम् ॥१०॥

**मेघाष्टकम् ॥**

## (१२)

एतस्मात् किं ब्रूमो लक्ष्म्या दूरादयमितोद्या(या)मा ।
आदाय पदैर्गदितं सुमुखि ! **समुद्राष्टकं** नाम ॥१॥

एतस्माज्जलधेर्जलस्य कणिकाः काश्चिद् गृहीत्वा ततः
पाथोदाः परिपूरयन्ति जगतीं रुद्धाम्बरा वारिभिः ।
भ्राम्यन् मन्दरकूटकोटिघटनाभीतिभ्रमत्तारिकां
प्रापैकां जलमानुषीं त्रिभुवने श्रीमानभूदच्युतः ॥२॥

किं ब्रूमो जलधेः श्रियं स हि खलु श्रीजन्मभूमिः स्वयं
वाच्यं कि(किं) महिमापि यस्य हि नवद्वा(द्वी ?)पं महीति श्रुतिः (?) ।
त्यागस्तस्य स कोऽपि बिभ्रति जगद् यस्यार्थिनो ह्यम्बुदाः
शक्तेः कैव कथा हि यस्य भवति क्षोभेण कल्पान्तरम् ॥३॥

लक्ष्म्यास्त्वं निलयो निधिश्च पयसां निःशेषरत्नाकरो
मर्यादानिरतस्त्वमेव जलधे ! ब्रूतेऽत्र कोऽन्यादृशम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किन्त्वेकस्य गृह मेतस्य (हं त्वमस्य?) वडवावह्नेः सदा तृष्णा(ष्ण)या (?)।
क्लान्तस्योदरपूरणेऽपि न सहो यत् तन्मनाग् मध्यमम् ॥४॥

दूरान्मार्गग्लपितवपुषो मारुतोत्तम्भितान्तः-
कल्लोलालीबहलवितृषो धाविताः पान्थसार्थाः ।
व्यावर्त्तन्ते तटमुपगता यस्य विच्छिन्नवाञ्छा-
स्तस्याऽम्भोधेर्विफलपयसो वार्यतः किं न शुष्कम् ? ॥५॥

अयं वारामेको निलय इति रत्नाकर इति
श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः ।
क एवं जानीते निजकरपुटीकोटरगतं
क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः ॥६॥

इतो वसति केशवः पुरमितस्तदीयद्विषा-
मितोऽपि शरणागताः शिखरिपक्षिणः शेरते ।
इतोऽपि वडवानलः सह समस्तसंवर्त्तकै-
रहो ! विततमूर्जितं भरहं(हरं ?) च सिन्धोर्वपुः ॥७॥

यामारोहति वाञ्छति स्थगयितुं तेजांसि तेजस्विनी-
मुच्चैर्गर्जति पूरयत्यतिमहीमम्भोभिरम्भोधरः ।
का(कां)श्चिद् द्रागुपजीव्य तोय च(चु)लुकान् सिन्धो ! भवत्सन्निधौ
पानीयप्रचयेषु सत्स्वपि न ते जातो विकारः क्वचित् ॥८॥

आदाय वारि परितः सरितां शतेभ्यः
किं नाम साधितमनेन महार्णवेन ।
क्षारीकृतं च वडवावदने हुतं च
पातालकुक्षिकुहरेषु निवेशितं च ॥९॥

**समुद्राष्टकम् ॥**

( १३ )

शीतांशुस्ते केचिन् नम्रग्व(त्वं) ये करे विपदि वाञ्छा ।
गर्वे(र्व)मिति चन्द्रवदने **सत्पुरुषाष्टक**[मिदं] गदितम् ॥१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शीतांशुः किं सुधायामभवदुत सुधैवाभवच्छीतरश्मा-
वाहोश्विद् द्वावपीमौ मृगदृशि घटितावेतयोः किं मृगाक्षी ।
एकैकं सज्जनाद्वा समजनि जनितः सज्जनो वा किमेभिः
सन्देहश्चाऽयमित्थं कथमपि मनसो जीवतां न प्रयातः ॥२॥

ते केचिन्निजकान्तिसुन्दरतया चेतश्चमत्कारिणो
दृश्यन्ते परमोत्सवं नयनयोः सम्पादयन्तो जनाः ।
अन्तर्ये मनसः प्रविश्य सहसा तैस्तैः स्वकीयैर्गुणै-
राजन्मावधि नोत्तरन्ति हृदयादुत्कीर्णबिम्बा इव ॥३॥

ये प्राप्ते व्यसनेऽप्यनाकुलधियः सम्पत्सु नैवोन्नताः
प्राप्ते नैव पराङ्मुखाः प्रणयिनि प्राणोपभोगैरपि ।
ह्रीमन्तः स्वगुणप्रपञ्चनविधावन्यस्तुतावुत्सुका
धिग् ! धात्रा कृपणेन तेऽपि न कृताः कल्पान्तदीर्घायुषः ॥४॥

करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता
मुखे सत्या वाणी विजयिभुजयोः पौरुषमलम् ।
हृदि स्वच्छा वृत्तिः श्रुतमवितथं च श्रवणयो-
र्विनाऽप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥५॥

वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद् भयम् ।
भक्तिश्चाऽर्हति शक्तिरात्मदमने संसर्गमुक्तिः खले
एते यत्र वसन्ति निर्मलगुणाः श्लाघ्यास्त एव क्षितौ ॥६॥

गर्वं नोद्वहते न निन्दति परं नो निष्ठुरं भाषते
प्रोक्तः केनचिदप्रियाणि सहते क्रोधं च नालम्बते ।
श्रुत्वा काव्यमलक्षणं परकृतं सन्तिष्ठते मूकवत्
दोषान् छादयति स्वयं न कुरुते चैतत् सतां लक्षणम् ॥७॥

सत्पुरुषाष्टकम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१४)

चिन्तामन्तः कौपं रेवा दन्ते तथैव नो मन्ये ।
न चरति घासग्रासं **गजाष्टकं** विश्रुतं लोके ॥१॥

चिन्तामिमां वहसि किं गजयूथनाथ !
योगीव योगविनिमीलितनेत्रयुग्मम् ।
पिण्डं गृहाण पिब वारि यथोपनीतं
दैवाद् भवन्ति विपदः खलु सम्पदो वा ॥२॥

अन्तःसमुत्थविरहानलतीव्रताप-
सन्तापिताङ्ग ! करिपुङ्गव ! मुञ्च शोकम् ।
धात्रा स्वहस्तलिखितानि ललाटपट्टे
को वाऽक्षराणि परिमार्जयितु समर्थः ? ॥३॥

कौपं वारि विलोक्य वारणपते ! किं विस्मितेनाऽऽस्यते
प्रायो भाजनमस्य संप्रति भवांस्तत् पीयतामादरात् ।
उन्मज्जच्छफरी-पुलिन्दललनापीनस्तनास्फालन-
स्फारीभूतमहोर्मिनिर्मलजला दूरेऽधुना नर्मदा ॥४॥

रेवापयः किशलयानि च सल्लकीनां
विन्ध्योपकण्ठगहनं स्वकुलं च हित्वा ।
किं ताम्यसि द्विप ! गतोऽसि वशं करिण्याः
स्नेहो हि कारणमनर्थपरम्परायाः ॥५॥

दन्ते न्यस्तकरः प्रलम्बितशिरः(राः) सम्मील्य नेत्रद्वयं
किं त्वं वारण ! खिद्यसे वनितया को नाम नो वञ्चितः ।
भूत्वा शान्तमना गृहाण कवलं स्नेहोऽधुना त्यज्यतां
ये मत्ता ह्यविवेकिनो विषयिणस्ते प्राप्नुवन्त्यापदम् ॥६॥

नो मन्ये दृढबन्धनक्षतमिदं नैवाङ्कुशोद्घट्टनं
स्कन्धारोहणताडनात् परिभवो नैवाऽन्यदेशागमः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चिन्तां मे जनयन्ति चेतसि यथा स्मृत्वा स्वयूथं वने
सिंहत्रासितभीतभीरुकलभा यास्यन्ति कस्याऽऽश्रयम् ? ॥७॥

न चरति वनराज्यां पल्लवान् शल्लकीनां
न पिबति गिरिकुञ्जे नैर्झरं वारि हारि ।
विततरदनकोटौ दत्तहस्तावलम्बो
वहति विरहखिन्नः शोकभारं करीन्द्रः ॥८॥

घासग्रासं गृहाण त्यज करिकलभ ! प्रीतिबन्धं करिण्याः
पाशग्रन्थिव्रणानामविरतमधुना देहि पङ्कानुलेपम् ।
दूरीभूतास्तवैते शबरवरवधूविभ्रमोद्भ्रान्तिदृष्टा
रेवातीरोपकण्ठद्रुमकुसुमरजोधूसरा विन्ध्यपादाः ॥९॥

गजाष्टकम् ॥

( १५ )

किं जातोऽस्य न्व जातोऽसि, भुक्तं मूलं तथैव च ।
किं ते न्यग्रोधपान्थाश्च हंहो ! **वृक्षाष्टकं** शृणु ॥१॥

किं जातोऽसि चतुःपथे घनतरं छन्नोऽसि किं छायया
छन्नश्चेत् फलितोऽसि किं यदि फलैः पूर्णोऽसि किं सन्नतः ।
हे सद्वृक्ष ! सहस्व संप्रति चिरं शाखाशिखाकर्षणं
क्षोभो मोटनभञ्जनानि जनतः स्वैरेव दुश्चेष्टितैः ॥२॥

जातो मार्गे सुरभिकुसुमः सत्फलो नम्रशाखः
स्फीताभोगो बहलविटपः स्वादितो योपगूढः ।
नैवात्मार्थं वहसि महतीं पादपेन्द्र ! श्रियं ता-
मापन्नार्त्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ॥३॥

मूलं योगिभिरुद्धृतं निवसितं वासोर्थिभिर्वल्कलं
भूषार्थी च जनश्चिनोति कुसुमं भुङ्क्ते क्षुधार्त्तः फलम् ।
छायामातपिनो विशन्ति वि(नि?)चिता निद्रालुभिः पल्लवाः
कल्पाख्यस्य तरोरिवेह भवतः सर्वाः परार्थाः श्रियः ॥४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किं ते नम्रतया० ॥६॥

न्यग्रोधे फलशालिनि स्फुटरसं किञ्चित् फलं पच्यते
बीजाण्य(न्य)ङ्कुरगोचरणि कतिचित् सिध्यन्ति तस्मिन्नपि ।
एकस्तेष्वपि कश्चिदङ्कुरवरो बध्नाति तामुन्नतिं
यामध्यास्य जनः स्वमातरमिव क्लान्तिच्छिदे धावति ॥७॥

पान्थाधार इति द्विजश्रिय इति श्लाघ्यस्तरूणामिति
स्निग्धच्छाय इति प्रियो दृश इति स्ना(स्था)नं गुणानामिति ।
यावत् तत्क्षणमाश्रयन्ति गुणिनः क्लान्तिच्छिदे पादपं
तावत् कोटरनिर्गतैरहिगणैर्दूरं समुत्सारिताः ॥८॥

हंहो पान्थ ! किमाकुलं श्रमवशादत्युद्धतं धावसि
प्रायेणाऽस(स्य)महाद्रुमस्य भवतो(ता) वार्ताऽपि नाऽऽकर्णिता ।
मूलं सिंहसमाकुलं तु शिखरे प्रोच्चण्डतुण्डाः खगा
मध्ये कोटरभाजि भीषणफणाः फूत्कुर्वते पन्नगाः ॥९॥

भ्राम्यद्भृङ्गधराऽवनम्रकुसुमः श्चोतन्मधूद्ग्रन्थिषु
छायावत्सु तलेषु पान्थनिचया विश्रम्य गेहेष्विव ।
निर्यन्निर्झरवारिवारिततृषस्तृप्यन्ति येषां फलै-
स्तेनेदं नु फलन्तु यान्तु च परामभ्युन्नतिं पादपाः ॥१०॥

**वृक्षाष्टकम् ॥**

(१६)

बीजैरन्येहाधिक् योऽयं किं नाम विरम चान्यत्ते (न्ये ते) ।
हंहो चातकशब्दै-**र्बप्पीहस्याष्टकं** नाम ॥१॥

बीजैरङ्कुरितं० ॥२॥

अन्येऽपि सन्ति भुवि तामरसावतंसा
हंसावलीवलयिनो जलसन्निवेशाः ।
कोऽपि ग्रहो गुरुरयं हतचातकस्य
पौरन्दरीं यदभिवाञ्छति वारिधाराम् ॥३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हा धिक् ! परव्यसनदुर्ललितस्य येन
केनापि रे सरलचातक ! वञ्चितोऽसि ।
येनाऽम्बुवाहमपि याचसि याचितस्य
यस्याऽस्य याचितुरिवाऽतिमलीमसत्वम् ॥४॥

योऽयं वारिधरो धराधरशिरस्यभ्युन्नतः केवलं
गर्जत्येव गभीरधीरनिनदेनाऽयं सखे ! वारिदः ।
तत्ते चातक ! पातकस्य कतमस्यैतत् फलं पच्यते
येनाऽसौ न ददाति याचितवते चेतोऽपि निर्विन्नताम् (?) ॥५॥

किं नाम दुःकृतमिदं भवतश्चकास्ति
येनात्र दैन्यपिशुनं बत याचितोऽपि ।
एतेऽपि कामनिभृतोन्नतयोऽपि तृप्त्यै
मुञ्चन्ति चातक ! पयो न पयोमुचस्ते ॥६॥

विरम चातक ! दैन्यमपास्यतां, बत चटूनि कियन्ति करिष्यसि ? ।
विधिविनिर्मितमम्बुकणद्वयं, किमधिकं कलयाऽपि भविष्यति ? ॥७॥

अन्ये ते जलदायिनो जलधरास्तृष्णां विनिघ्नन्ति ये
भ्रातश्चातक ! किं वृथाऽत्र रटितैः खिन्नोऽसि विश्रम्यताम् ।
मेघः शारद एष काशधवलः पानीयरिक्तोऽधरो
गर्जत्येव हि केवलं भृशमपां नो बिन्दुमप्युज्झति ॥८॥
किमत्र०

**बप्पीहाष्टकम् ॥**

( १७ )

पथि परिहृत कनक मन स्तमित विरम रत्न केन संत्यन्ये ।
एकस्मिन् वणिगधिपतिपादे रत्नाष्टकं गदितम् ॥१॥

पथि परिहृतं कैश्चिद् दृष्ट्वा न जातु परीक्षितं
विधृतमपरैः काचं मत्वा पुनः परिवर्जितम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गवलगणनामन्यैः कृत्वाऽपघृष्टमपण्डितै-
र्मरकतमहो ! मार्गावस्थं कथं न विडम्बितम् ! ॥२॥

कनकभूषणसङ्ग्रहणोचितो यदि मणिस्त्रपुणि[प्रति]पद्यते ।
न च विरौति न चापि स शोभते, भवति योजयितुर्वचनीयता ॥३॥

कुस्त(मनस्ति ?)मितसारस्य (?), तेजसस्तद्विजृम्भितम् ।
येन पाषाणखण्डस्य मूल्य(ल्यं ?) मूल्यं वसुन्धरा ॥४॥

विरम रत्न ! मुधा तरलायसे, तव न कश्चिदिहास्ति परीक्षितः(क्षकः) ।
विधिवशेन परिच्युतमाकरात्, त्वमपि काचमणिः(णी)कृतमीश्वरैः ॥५॥

केनासीनः सुखमकरुणेनाऽऽकरादुद्धृतस्त्वं
विक्रेतुं वा समभिलखि(षि)तः केन देशान्तरेऽस्मिन् ।
यस्मिन् वित्तव्ययभरसहो ग्राहकस्तावदास्तां
नास्ति भ्रातर्मरकतमणे ! त्वत्परीक्षाक्षमोऽपि ॥६॥

सन्त्यन्ये झषकेतनस्य मणयः किं नोल्लसत्कान्तयः
किं वा तेऽपि जने न भूषणपदं न्यस्ता न शोभाभृतः ।
अन्यः कोऽपि तथापि कौस्तुभमणिः स्फीतस्फुरद्दीधिति-
र्यः पूषेव नभः समुज्ज्वलयति स्फारं मुरारेरुरः ॥७॥

एकस्मिन् दिवसे मया विरचि(चर)ता प्राप्तः कथञ्चिन्मणि-
र्मूलं यस्य न विद्यते भवति चेत् पृथ्वी समा(म)स्ता ततः ।
सोऽयं दैववशादभूदतितरां काचोपमः साम्प्रतं
किं कुर्मः किमुपास्महे **कस्स** सुहृद् यस्याऽयमावेद्यते ॥८॥ (?)

वणिगधिपतेः(ते !?) किञ्चित् कुर्म्म व्युत्कुर्म्मिह(?) मा कृथाः
कथय निभृतं केयं नीतिः पुरे तव संप्रति ।
मरकतमणिः काचो वाऽयं भवेदिति संशये
लवणवणिजां यद्व्यापारः परीक्षितुमीक्ष्यते ॥९॥

**रत्नाष्टकम्** ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

( १८ )

जातस्त्वं भुवनाधिपो यदि ततः किं सिद्धमेतावता
प्राप्तो वा यदि निःस्वतां विधिवशात् तेनापि किं ते गतम् ।
तस्मात् तोष-विषादबन्धनमिदं व्याधूय संचिन्त्यतां
ज्योतिर्यत्र लयं गते त्रिभुवनेऽप्यामा(भा?)समालोक्यते ॥१॥

भ्रातर्मोह ! विमुञ्च खेदमसमं ये राज्यवचा(?)र्गलां
भित्त्वा धा(सा?)रधियो वनाय चलितास्तेषां न मल्लो भवान् ।
प्रज्ञाभिर्दृढकर्मपाशवलये(यो)च्छेदाक्षमास्त(स्त्व)द्धयाद्
दाराद्यैर्बिसतन्तुभिर्निगडितास्तिष्ठन्ति ये ते वयम् ॥२॥

त्रैलोक्यं सकलं त्रिकालविषयं मा लोकमालोकितं (?)
साक्षाद् येन यथा स्वयं करतले रेखात्रयं साङ्गुलि ।
रागद्वेषभयामयान्तकजरालोकत्वलोभादयो
नाऽलं यत्पदलङ्घनाय स महादेवो मया वन्द्यते ॥३॥

यो विश्वं वेद वेद्यं जननजलनिधेर्भङ्गिनः पारदश्वा
पौर्वापर्याविरुद्धं वचनमनुपमं निष्कलङ्कं यदीयम् ।
तं वन्दे साधुवन्द्यं सकलगुणनिधिं ध्वस्तदोषद्विषन्तं
बुद्धं वा वर्धमानं शतदलनिलयं केशवं वा शिवं वा ॥४॥

माया नास्ति जटा न चापि मुकुटं चन्द्रो न मूर्धावली
खट्वाङ्गं न च वासुकिर्न च धनुः शूलं न चोग्रं मुखम् ।
कामो यस्य न कामिनी न च वृषो गीतं च नृत्यं पुनः
सोऽयं पातु निरञ्जनो **जिनपतिः** सर्वत्र सूक्ष्मः शिवः ॥५॥

दग्धं येन पुरत्रयं शरभुवा तीव्रार्चिषा वह्निना
यो वा नृत्यति मत्तवत् पितृवने यस्याऽऽत्मजो वा गुहः ।
सोऽयं किं मम शङ्करो भयतृषारोषार्त्तिमोहक्षयं
कृत्वा यः स तु सर्ववित् तनुभृतां क्षेमङ्करः शङ्करः ॥६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पत्राद् (?)येन विदारितं कररुहैर्दैत्येन्द्रवक्षःस्थलं
सारथ्येन धनञ्जयस्य समरे योऽमारयत् कौरवान् ।
................ नासौ विष्णुर्विशिष्टो मम ॥७॥ (?)

एको नृत्यति विप्रसार्थ कु(क)कुभां चक्रे सहस्त्रं भुजा-
मेकः शेषभुजङ्गभोगशयने व्यादाय निद्रायते ।
दृष्ट्वा चारुतिलोत्तमासु(मु)खमगादेकश्चतुर्वक्त्रता-
मेते मुक्तिपदं वदन्ति विदुषामित्येतदत्यद्भुतम् ॥८॥

**( देवाष्टकम् ? )**

**( ११ )**

वीचीकैवर्त्त यद्भग्नं छित्वा शशिदिवाकरम् ।
अलं सृजति पौष्याश्च, **भग्नाशस्याऽष्टकं विधेः** ॥१॥

वीचीव्याप्त वियन्निरुद्धवसुधं क्काऽगाधरन्ध्रं पयो
गोलाङ्गूलविलोलपाणितुलिताः क्षुद्राः क्क ते क्ष्माभृतः ।
बद्ध्वा दाशरथिस्तथापि जलधिं प्रत्याजहार प्रियां
ग्रावाणोऽपि तरन्ति वारिणि यदा पुंसोऽनुकूलो विधिः ॥२॥

कैवर्त्तकर्कशकरग्रहणच्युतोऽपि
जाले पुनर्निपतितः शफरो वराकः ।
जालादपि प्रगलितो गिलितो बकेन
वामे विधौ बत कुतो व्यसनान्निवृत्तिः ? ॥३॥

यद् भग्नं धनुरीश्वरस्य शिशुना यज्जामदग्न्यो जित-
स्त्यक्ता येन गुरोर्गिरा वसुमती बद्धो यदम्भोनिधिः ।
एकैकं दशकन्धरक्षयकृतो रामस्य किं वर्ण्यते
दैवं वर्णय येन सोऽपि सहसा नीतः कथाशेषताम् ॥४॥

छित्त्वा पाशमपास्य कूटरचनां भङ्क्त्वा बलाद् वागुरां
पर्यन्ताग्निशिखाकलापजटिलान्निर्गत्य पारं वनात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याधानां शरगोचरादतिजवेनोत्प्लुत्य धावन्मृगः
कूपान्तः पतितः करोति विधुरे किंवा विधौ पौरुषम् ॥५॥

शशिदिवाकरयोर्ग्रहपीडनं गजभुजङ्गविहङ्गमबन्धनम् ।
मतिमतां च समीक्ष्य दरिद्रतां विधिरहो ! बलवानिति मे मतिः ॥६॥

अलङ्कारः शङ्काकरनरकपालं परिकरो
विशीर्णाङ्गो भृङ्गी वसु च वृष एको गतवयाः ।
अवस्थेयं स्थाणोरपि भवति यत्राऽमरगुरो-
र्विधौ वक्रे मूर्ध्नि स्थितवति वयं के पुनरमी ? ॥७॥

सृजति० ॥८॥

पौष्पं पञ्च शराः शरासनमपि ज्याशून्यमिक्षोर्लता
जेतव्यं जगतां त्रयं स च पुनर्जेताऽप्यनङ्गः किल ।
इत्याश्चर्यपरम्पराघटनया चेतश्चमत्कारयन्
व्यापारः सुतरां विचारपदवीवन्ध्यो विधेर्वन्द्यताम् ॥९॥

भग्नाशस्य करण्डपिण्डित(त)नोर्ग्लानेन्द्रियस्य क्षुधा
कृत्वाऽऽखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
स्वस्थास्तिष्ठत दैवमेव हि नृणां वृद्धौ क्षये चाऽऽकुलम् ॥१०॥

**दैवाष्टकम् ॥**

## ( २० )

श्रुत्वा श्रद्धाय सम्यक् शुभगुरुवचनं वेश्मवासं निरस्य
प्रव्रज्याऽथो पठित्वा बहुविधतपसा शोषयित्वा शरीरम् ।
धर्मध्यानाय यावत् प्रभवति समयस्तावदाकस्मिकीयं
प्राप्ता मोहस्य धाटी तडिदिव विषमा हा ! हताः कुत्र यामः ? ॥१॥

एकेनाऽपि महाव्रतेन यतिनः खण्डेन भग्नेन वा
दुर्गत्यां पततो न सोऽपि भगवानीष्टे स्वयं रक्षितुम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हत्वा तान्यखिलानि दुष्टमनसो वर्तामहे ये वयं
तेषां दण्डपदं भविष्यति कियज्जानाति तत् केवली ॥२॥

कट्यां चोलपटं तनौ सितपटं कृत्वा शिरोलोचनं[1]
स्कन्धे कम्बलिकां रजोहरणकं निक्षिप्य कक्षान्तरे ।
वक्त्रे वस्त्रमुखं[2] विधाय ददतः श्रीधर्म्मलाभाशिषं
वेषाडम्बरिणः स्वजीवनकृते विद्मो गतिं नाऽऽत्मनः ॥३॥

भिक्षा पुस्तकवस्त्रपात्रवसतिप्रावारलुब्धा यथा
नित्यं मुग्धजनप्रतारणकृते कष्टेन खिद्यामहे ।
आत्मारामतया तथा क्षणमपि प्रोज्झ्य प्रमादद्विषां(षं)
स्वार्थाय प्रयतामहे यदि तदा सर्वार्थसिद्धिर्भवेत् ॥४॥

पाषण्डानि सहस्रशो न(ज)गृहिरे ग्रन्था भृशं पेठिरे
लोभाज्ञानवशात् तपांसि बहुधा मूढैश्चिरं तेपिरे ।
क्वापि क्वापि कथञ्चनापि गुरुभिर्भूत्वा मुदो भेजिरे
कर्मक्लेशविनाशसम्भवसुखान्यद्यापि नो लेभिरे ॥५॥

किं भावी नारकोऽहं किमुत बहुभवा(वी)दूरभव्यो नभव्यः ?
किं वाऽहं कृष्णपक्षी किमचरणगुणस्थानकी कर्मदोषात् ? ।
वह्निज्वालेव शिक्षा व्रतमपि विषवत् खड्गधारा तपस्या
स्वाध्यायः कर्णशूची यम इव विषमः संयमो यद्विभाति ॥६॥

वस्त्रं पात्रमुपाश्रयं बहुविधं भैक्षं चतुर्द्धौषधं
शय्यापुस्तकपुस्तिकोपकरणं शिष्यं च कृष्या(?शिक्षा)मपि ।
गृह्णीमः परकीयमेव नितरामाजन्मगृद्धा वयं
यास्यामः कथमीदृशेन तपसा तेषां हहा ! निःक्रयम् ॥७॥

अन्तर्मत्सरिणां बहिः शमवतां प्रच्छन्नपापात्मनां
नद्यम्भःकृतशुद्धिमद्यपवणिग्दुर्वासनाशालिनाम् ।
पाखण्डव्रतधारिणां बकदृशां मिथ्यादृशामीदृशां
बद्धोऽहं धुरि तावदेव चरितैस्तन्मे हहा ! का गतिः ? ॥८॥

---

१. ०लुञ्चनं । २. वस्त्रमथो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रागो मे स्फुरति क्षणं क्षणमथो वैराग्यमुज्जृम्भते
द्वेषो मां भजति क्षणं क्षणमथो मैत्री समालिङ्गति ।
दैन्यं पीडयति क्षणं क्षणमथो हर्षोऽपि मां बाधते
कोपोऽयं कृपणः कृपापरिभृतैः कार्ये(र्यो) हहा ! कर्मभिः ॥९॥

येषां दर्शनवन्दनाप्रणमनस्पर्शप्रशंसादिना
मुच्यन्ते तमसा निशा इव सिते पक्षे प्रजास्तत्क्षणात् ।
तादृक्षा अपि केऽपि केऽपि मुनयस्तेभ्यो[१] नमः कुर्महे
संविज्ञा वयमात्मनिन्दनमिदं कुर्मः पुनर्बोधये ॥१०॥

**निन्दाष्टकम्** ॥२०॥

शुभं भवतु ॥

---

१. स्तेषा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org